उपरागस्तु राहौ च स्वत्यास्यव्यसने तथा।
सूर्यचन्द्रग्रहे च स्यादुपरक्तौ च कीर्तितः ॥ ४१ ॥
उपसर्गः क्रियायुक्तनाम्नो संसर्ग एव च।
उत्पाते चाप्यथोरगे ग्रहणे चन्द्रसूर्ययोः ॥ ४२ ॥
राहौ चोपप्लवोऽभ्यासे चेति धीराः प्रचक्षते।
उपग्रहस्तु बन्दौ स्याद् ग्रहणेऽप्यनुकूलने ॥ ४३ ॥
स्यात् परस्मैपदेऽप्येव आत्मनेपद एव च।
उपस्पर्शस्तु संस्पर्शे स्नानाचमनयोरपि ॥ ४४ ॥
उपकारस्तूपकृतौ विकीर्णकुसुमादिषु।
इत्युक्तं कैश्चिदस्माकं भाति न तदयुक्तवत् ॥ ४५ ॥
उपचारस्तु तत्र स्यात् सकारो यो विधीयते।
विसर्जनीयस्य स्थाने प्राभृ(तोके) चाप्युपासने ॥ ४६ ॥
उपनाहस्तु[2] वैरानुबन्धे वीणानिबन्धने।
पक्ष्मलोचनसन्धिस्थ[3]रोगभेदे च मन्यते ॥ ४७ ॥
व्रणादे[4]र्भेषजे बीजेऽप्युपनाहस्तु कीर्त्यते।
रोगे तापेऽप्यथ प्रोक्ता वारिवाहमहेन्द्रयोः ॥ ४८ ॥
ऋञ्जसानः श्मशाने च त्रिष्वर्थेषु मनीषिभिः।
कारस्करो राजवृक्षे गिरिभेदे च दर्शितः ॥ ४९ ॥
कौरालिङ्को वृक्षनाम्ने पठितः + [6]डिङ्कयो.$ ।
कारोत[7]रः* सुरामण्डे कूपे कामोत्सवः पुनः ॥ ५० ॥

---

१. 'व' क. च. पाठः. २. 'दा' क. ग. च. पाठः. ३. 'रा' ट. पाठः. ४. 'देर्भेषजैर्बीजे' क. ङ. च. पाठः. ५. 'क' ग. ङ. च. पाठः. ६. 'रि' ग. ङ. पाठः. ७. 'त' ग. पाठः.

---

$ खञ्जिखञ्जयोः' इति स्यात्। 'खञ्जनकौ कारालिङ्कः' (पृ. २६६. श्लो. २०) इति वैजयन्ती। * 'कारोतरो नाम वैदलश्च निर्मितो भाजनविशेषः, यस्मिन् सुरायाः स्रावणं ...' इति ऋग्भाष्यम्। 'कारोत्तरः सुरामण्डः' इति यादवामरसिंहौ।

कामाद्धर्षे तथा कामस्येतरसे कोष दर्शितः ।
अथ कामगुणो रागे विषयाभोगयोरपि ॥ ५१ ॥

कालधर्म तु कालस्य धर्मेऽपि मरणेऽपि च ।
क्रियाकारः संविदि च क्रियायाः करणेऽपि च ॥ ५२ ॥

कुरुविन्दो रत्नभेदे मुस्तके द्विहुले तथा ।
आरण्यक्षुद्रधान्यानां रुक्षानामेकधान्यके ॥ ५३ ॥

ग्रहराजस्तु विज्ञेयो भास्करे चन्द्रमस्यपि ।
शक्रे धातुकमत्तेभे वर्षुकाब्दे घनाघनः ॥ ५४ ॥

घनसारस्तु कर्पूरे दक्षिणावर्तपारते ।
चन्द्रोदयः स्यादुल्लोचे शशाङ्कस्योदयेऽपि च ॥ ५५ ॥

चन्द्रहासोऽसिमात्रे स्याद् दशास्यस्याप्ययत्नावसौ ।
खड्गभेदेऽपि तं प्रादुर्येजयन्त्यां यथारणे ॥ ५६ ॥

चन्द्रहासोऽर्धचन्द्राग्र इति शब्दार्थकोविदः ।
चित्रभानू रवौ वह्नौ देशे जनपदो जने ॥ ५७ ॥

जनक्षयस्तु सङ्क्रमे जनस्यापि क्षये मतः ।
तमोनुदः सहस्रांशौ शीतांशौ पावकेऽपि च ॥ ५८ ॥

तनूनपात् तु यास्कोक्त आज्ये चाग्नौ च निश्चितः ।
तिरस्कारः परिभवेऽप्यन्तर्धेऽपचारतः ॥ ५९ ॥

अन्तर्धौ चाथ विज्ञेयस्त्रिकण्टक इति ध्वनिः ।
गोक्षुरे च त्रिपत्रायां सुक्षां चाथ निबोधत ॥ ६० ॥

हिन्तालतालद्रुमयोस्तृणराज इति ध्वनिः ।
दर्दरीकस्तु वादित्रविशेषे डाडिमे तथा ॥ ६१ ॥

अनिले चन्द्र इत्यन्ये दधिपाय्यस्तु सर्पिषि ।
पृषत्यपीति केषाञ्चिन्मतमेतन्न तच्छुभम् ॥ ६२ ॥

---

१. 'च निद' क. ङ. च. पाठः. २. 'ौ' क. ङ. च. पाठः. ३. 'भा' क. च. पाठः. ४. 'भा' क. च. पाठः. ५. 'पि' ग. पाठः. ६. 'च' क. ग. ङ. पाठः.

व्यवच्छेदस्तु विज्ञेयो धनुषः शरमोक्षणे ।
व्या:वर्तनायां चाथ स्याद् व्यसनव्यतिषङ्गयोः ॥ १०७ ॥

ज्ञेयो व्यतिकरोऽत्राह सज्जनः शब्दवित्तमः ।
व्याजप्रस्तावसम्पर्काद्युक्ति(व्य ? व्यं)तिकरध्वनिः ॥ १०८ ॥

इत्येवम(र्थे ? त्र)शब्दार्थो विविच्यन्तां मनीषिभिः ।
विनायको गणपतौ सुगतेऽथ विरोचनः ॥ १०९ ॥

अर्केन्दुवह्निष्व[२]सुरराजेऽप्यथ विभीषणः ।
पुरन्दरे रावणस्य कनिष्ठेऽप्यथ कथ्यते ॥ ११० ॥

विप्रलापो विरोधोक्तौ विप्रलम्भोपमर्दयोः ।
विप्रस्य भाषणे चाथ विशोलिम इति ध्वनिः ॥ १११ ॥

चन्द्रे सूर्येऽप्यर्थो [५]बिन्दुतन्त्र इत्यजयोऽपठीत् ।
चतुरङ्गे पाशके च विश्वगोप्ता तु शार्ङ्गिणि ॥ ११२ ॥

शक्रेऽप्यथो विश्वकर्मा देववर्धकिसूर्ययोः ।
अब्जजे वैजयन्त्याह विरिञ्चोऽब्जज उच्यते ॥ ११३ ॥

वि[६]श्वेदेवास्तु सूर्येऽग्नौ वृकधूपध्वनिः पुनः ।
श्रीपिष्टाह्वयनिर्यासे निर्यासे कृत्रिमाह्वये ॥ ११४ ॥

वृधसानस्तु पुरुषे मूर्त्यौ भूमिधनेऽपि च ।
वेशवारः पिष्टमांसविशेषे चाप्युपस्करे ॥ ११५ ॥

शरवारिः शरमुखे पातक्यैशरजीविनोः ।
शिशिम्बिष्टस्तु मेघे स्याद् भारद्वाजेऽप्यभाषत ॥ ११६ ॥

समूहे स्यात् समुदयः समरे च समुद्गमे ।
समुदायस्तु युद्धे स्यात् समूहेऽथ समुच्छ्रयः ॥ ११७ ॥

---

१. 'द् व्यक्ति' क. ङ. च. पाठः. २. 'ज्ये' क. ग. च. पाठः. ३. 'स्वर्गे' क. ङ. पाठः. ४. 'थ' क. ङ. च. पाठः. ५. 'विद्स्तत्र इ' क. ङ. च. पाठः. ६. 'श्व' [illegible] पाठः. ७. 'दौ' ग. पाठः. ८. 'वातयक्य' ग. पाठः. ९. 'क्ष्य' क. च. पाठः. [illegible] च., 'रिम्बिरस्तु' ङ. पाठः.

†[आढकीसंज्ञधान्ये चाप्यथो ना करपल्लवः।
बाहौ किसलयप्रख्यकरे[1] त्वेष[2] नृशण्डयोः॥]

करपाली स्त्रियामीलीसंज्ञे शस्त्रे[3] पुमान् पुनः।
करपालो भवेत् खङ्गे पालके तु करस्य सः॥ १५१॥

त्रि स्यात् पुनर्नवायां तु रक्तायां स्यात् कठिल्लकः।
कारवेल्ले च (टस्तु? नप् तु) स्यात् फलेऽस्याथो नपुंसकम्॥ १५२॥

कश्मीरजं कुङ्कुमे स्यात् त्रि तु कश्मीरसम्भवे।
क्रमेलको द्वे स्यादुष्ट्रे मर्त्यजात्यन्तरे तथा॥ १५३॥

उष्ट्र्यां निष्ट्यात् समुद्भूते स्यात् तु कर्षफला स्त्रियाम्।
आमलक्यां *पुनस्त्वेष विभीतकमहीरुहे॥ १५४॥

कुलत्थे स्त्री कफहरिः श्लेष्मघ्ने तु त्रिषु स्मृता।
कदम्बकं समूहे क्ली सर्षपे तु पुमानयम्॥ १५५॥

कटुत्कटं तु क्ली व्योषेऽप्यार्द्रकेऽपि त्रिषु त्वदः।
उत्कटे कटुनाऽथो ना शालिभेदे कलापकः॥ १५६॥

कलमाख्ये नपि त्वेतज्जानीयाद् विश्वभेषजे।
स्याद् विद्रुमलतायां तु कपोताङ्घ्रिः स्त्रियामियम्॥ १५७॥

कपोतस्य तु पादे ना द्वयोस्तु स्यात् कमण्डलुः।
चतुष्पाज्जातिभेदे क्लीपुंसोः कुण्ड्यां द्वयोः पुनः॥ १५८॥

स्यात् कालकण्ठो दात्यूहे समासार्थादि पूर्ववत्।
कालकुण्डस्तु ना विष्णौ यमे चापि द्वयोः पुनः॥ १५९॥

मनुष्यजातिभेदे स्यात् क्षत्रियायां निषादजे।
कालस्कन्धस्तमाले ना तिन्दुके चाथ कश्चन॥ १६०॥

---

१. 'तरौ त्वे' ग. पाठः. २. 'ष्त्वे' ङ. पाठः. ३. 'त्वेऽस्त्रियां पुनः' ङ. पाठः.

---

† इहास्य श्लोकस्य पाठो लेखकप्रमादायात इति भाति। पञ्चाक्षरस्य करपल्लवपदस्य चतुरक्षरकाण्डपाठासङ्गतेः। * 'पुमांस्त्वेषः' इति पाठः स्यात्।

एतथालाख्ये मत्स्यभेदे समासादीनि पूर्ववत् ।
स्थिरजिह्वस्तु मत्स्ये द्वे समासादीनि पूर्ववत् ॥ ६६९ ॥

स्थिरदंष्ट्रस्तु ना विष्णौ वराहाकृतिधारिणि ।
भुजङ्गमे तु द्वे अत्र समासादीनि पूर्ववत् ॥ ६७० ॥

सिंहपुच्छी पुनः स्त्रीत्वे पृश्निपर्णीति विश्रुते ।
ज्ञेया स्यादोषधिभेदे माषपर्ण्यां तु यादवः ॥ ६७१ ॥

अत्रापि पूर्ववत् साद्यमथो सिंहमलं नपि ।
†नीलिकासंज्ञलोहे स्यात् समासादीनि पूर्ववत् ॥ ६७२ ॥

अथ सिद्धरसः पुंसि पारदे भेद्यवत् पुनः ।
रससिद्धे समासार्थलिङ्गान्यत्रापि पूर्ववत् ॥ ६७३ ॥

अथ सिन्धूद्भवं क्लीबे सैन्धवे सादि पूर्ववत् ।
सुब्रह्मण्यस्तु ना स्कन्द ऋत्विग्भेदे तु नृस्त्रियोः ॥ ६७४ ॥

निगदाख्ययजुर्वेदविशेषे तु स्त्रियामियम् ।
सुब्रह्मण्यात्र सादीनि पूर्ववत् स्यात् सुदर्शनः ॥ ६७५ ॥

पुनः पुंसीक्ष्वाकुवंशप्रभवे क्षत्रियान्तरे ।
शङ्खगस्य सुते विष्णुचक्रे चान्यस्तु तत्रपि ॥ ६७६ ॥

तदप्रमाणमासानां कृतिभिर्हि विरुध्यते ।
क्लीबमेवामरावत्यां स्त्रियां तु स्यात् सुदर्शना ॥ ६७७ ॥

दध्यालीसंज्ञके वल्लीजातिभेदे द्वयोः पुनः ।
गृध्राह्वये पक्षिभेदे समासादीनि पूर्ववत् ॥ ६७८ ॥

सुचरित्रा पुनः स्त्रीत्वे कुस्तुम्बुर्यामिहापि च ।
पूर्ववत् स्यात् समासादि सुप्रतीकः पुनः पुमान् ॥ ६७९ ॥

ईशानदिग्गजेऽत्रापि पूर्ववत् साद्यथो नपि ।
सुविदत्रं कुटुम्बे च धनलाङ्गलयोरपि ॥ ६८० ॥

---

† 'मालिकायां तु सरटी निष्ठुरं दारुकण्टकम् । गुरुज्येष्ठं सिंहमलं पञ्चलोहाम्यलोहके' (पृ. ४३. श्लो. २७. २८) इति तु वैजयन्ती ।

समाहारे (च ! ऽथ) शण्डे च स्त्रियां चोपनिमन्त्रणा ।
श्यैतनौधसयोः साम्नोर्यद् गानं यज्ञकर्मणि ॥ ७ ॥

तत्र स्यादर्थलिङ्गादि तर्कणीयं विचक्षणैः ।
§+ + + + + + + त्वे कोहलायामथ स्मरेत् ॥ ८ ॥

सम्भवस्तु समासेषु लिङ्गान्यर्थाश्च पूर्ववत् ।
तोयप्रसादनः पुंसि कतकाख्यमहीरुहे ॥ ९ ॥

यथासमासमन्यत्र लिङ्गार्थाववधारयेत् ।
दक्षिणाशारतोऽगस्त्यमुनौ पुंसि त्रिषु त्वयम् ॥ १० ॥

सक्तो यो दक्षिणाशायां तत्रान्यत्र तु पूर्ववत् ।
पारावतपदी *+ + + + + + + भेषजे ॥ ११ ॥

पारावतस्य पादे स्यात् पारावतपदं नपि ।
पानीयसम्भवं तु क्ली (रू ? कू)प्याख्यलवणान्तरे ॥ १२ ॥

त्रि तु यत् किञ्चिदन्यत् स्यात् तत्र नीरसमुद्भवम् ।
पुष्पाभिकीर्णकस्तु द्वे स्याद् दर्वीकरसंज्ञिनाम् ॥ १३ ॥

भुजङ्गमानां भेदे च वैकरञ्जाख्यभोगिनाम् ।
भेदे च यस्तु पुष्पैः स्यादभिकीर्णस्त्रि तत्र हि ॥ १४ ॥

+ + + + + + + + + + + र्थश्च पूर्ववत् ।
‡+ + + कीर्णं दीर्त्य(?) पुनः सामान्तरे नपि ॥ १५ ॥

त्रिषु तु स्याद् दिवाकीर्त्ये महतीत्यवधारयेत् ।
अथ स्यात् करुणाभिख्ये मल्लिकाकुसुमः पुमान् ॥ १६ ॥

फलवृक्षे च जानीयाल्लिङ्गमर्थं च पूर्ववत् ।
सम्भवस्तु समासेषु मृत्युसंयमनः पुनः ॥ १७ ॥

---

१. 'कहला' ङ. पाठः.

---

§ 'चण्डकोलाहला स्त्री' इति पूरणीयं स्यात् । 'काहला तु कहाला स्याच्चण्डकोलाहलेति च' (पृ. १४६. श्लो. १२६) इति वैजयन्ती । * 'स्त्री स्याज्जीवन्तीसंज्ञ' इति पाठः स्यात् । 'पारावतपदी पिण्या जीवन्ती' (पृ. ५६. श्लो. १४०) इति वैजयन्ती । ‡ 'महादिवाकी-र्त्यशब्दः पु' इति पाठः स्यात् ।

